SS Coaching

This question paper consists of 37 questions and 8 printed pages.
अस्मिन् प्रश्नपत्रे 37 प्रश्नाः 8 मुद्रित पृष्ठाः च सन्ति ।

Roll No. अनुक्रमाङ्कः अङ्केषु | | | | | | | | | | | | |

Code No. 44/S/A/S
कूट सं.

# SANSKRIT
# संस्कृतम्
# (209)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ____________________

Signature of Invigilators 1. ____________________
(निरीक्षकहस्ताक्षरद्वयम्)
2. ____________________

---

**सामान्य अनुदेशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति ।

3 वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथकरूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।

4 वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

5 उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

6 स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **44/S/A/S** अवश्यं लेखनीया ।

# संस्कृतम्
# (209)

समय : होरात्रयम् | पूर्णाङ्काः – 100

निर्देशाः –

1 अस्मिन् प्रश्नपत्रे सप्तत्रिंशत् प्रश्नाः सन्ति ।

2 प्रत्येकप्रश्नस्य समक्षम् अङ्काः सूचिताः ।

3 सर्वे प्रश्नाः अनिवार्याः ।

1 'प्रेरणा' इति पाठानुसारं बोपदेवः ग्रन्थम् अरचयत् । 1

(A) ज्योतिषम् (B) व्याकरणम्

(C) छन्दःशास्त्रम् (D) कथासाहित्यम्

2 'त्याज्यं न धैर्यम्' इति पाठे ''मित्रस्य मरणं न चिन्तयामि'' इति कः कं प्रति कथयति ? 1

(A) मकरः वानरं प्रति (B) वानरः मकरं प्रति

(C) मकरः मकरीं प्रति (D) मकरी मकरं प्रति

3 'सदाचारः' इति पाठे पण्डितबुद्धयः नराः कथं न व्यवहरन्ति ? 1

(A) आपत्सु न मुह्यन्ति (B) नष्टं न शोचन्ति

(C) वृत्तं यत्नेन रक्षन्ति (D) अप्राप्यं वाञ्छन्ति

4 'जानासि' इति क्रियापदस्य उत्तमपुरुषे किं रूपं भविष्यति? 1

(A) जानामि (B) ज्ञातम्

(C) जानीमः (D) जानाति

5 यक्षयुधिष्ठिरसंवादानुसारं किं हित्वा प्रियः भवति ? 1

(A) क्रोधम्　　(B) कामम्

(C) मानम्　　(D) लोभम्

6 एतत् वाक्यम् अशुद्धम् अस्ति – 1

(A) ज्येष्ठः भवान् कुलं पालय ।

(B) अहं त्वया सह चलामि ।

(C) अहमेव अनेन सह गच्छामि ।

(D) किमर्थम् अस्मान् निवारयसि त्वम् ।

7 अस्मिन् पदे एव 'ल्यप्' प्रत्ययः नास्ति – 1

(A) संयम्य　　(B) आगत्य

(C) शब्दापय　　(D) प्रविश्य

8 एतत् पदम् अव्ययम् नास्ति – 1

(A) च　　(B) न

(C) सः　　(D) वा

9 आर्यभटीयम् केन विरचितम् ? तस्य जन्म कदा अभूत् ? 1+1=2

10 'भो मध्यम ! अस्मान् परित्रायस्व । एष राक्षसः अस्मान् हन्तुम् इच्छति ।' 1+1=2
अस्मिन् कथने कोऽयं मध्यमः ? कश्च राक्षसः ?

11 'यस्मिन् शरीरात् निर्गते तत् शरीरं नश्येत् स वः श्रेष्ठः' इति कथनेन कस्मिन् शरीरात् निर्गते शरीरं नश्यति ? सः च केषु श्रेष्ठः ? 1+1=2

12 वृक्षाः स्वयम् कुत्र तिष्ठन्ति ? केभ्यश्च छायां प्रयच्छन्ति ? 1+1=2

13 चलन्ति गिरयः कामं युगान्तपवनाहताः । कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः । 2
इति पद्यानुसारं कीदृशाः अपि पर्वताः चलन्ति, केषां मनः च विपत्सु अपि चलति ?

14 दृश्यतेऽसौ महान् सीते ! 1+1=2

सविद्युदिव तोयदः ।

ऋष्यमूको गिरिवरः,

काञ्चनैर्धातुभिर्वृतः । इति पद्ये 'मेघः',

'श्रेष्ठपर्वतः' इति पदयोः स्थाने किं पदद्वयं प्रयुक्तम् ?

15 'अतः श्वः प्रभाते अत्रागत्य मत्स्यसंक्षयं करिष्याम इति ।' इति वाक्ये कानि चत्वारि $\frac{1}{2} \times 4 = 2$
अव्ययपदानि प्रयुक्तानि ?

16 'एतयोः ग्रहाणां गतिः तेषां प्रभावाश्च वर्णिताः सन्ति ।' इति वाक्ये किं पदद्वयं 1+1=2
षष्ठ्यन्तं विद्यते ?

17 अधोलिखितवाक्यद्वये रिक्तस्थानानि पूरयत – 1+1=2

(अ) पुत्रः धारानगरं ________ (प्र + आप् + ल्यप्) राजद्वारम् उपतिष्ठति ।

(आ) मम सङ्केतं ________ (ज्ञा + त्वा) प्रत्युत्तरम् अपि अनेन प्रदत्तम् ।

18 अधोलिखितवाक्यद्वये रिक्तस्थाने क्रियापदं पूरयत – 1+1=2

(अ) क्षीयते ________ (वृध्) चैव, न समुद्रो न चन्द्रमाः ।

(आ) विद्वान् सर्वत्र ________ (पूज्)

19 'करुणापराः हि साधवः' इति पाठे देवाधिपेन शक्रेण केषु करुणा प्रदर्शिता, किमर्थञ्च मातलिः रथं निवर्तयितुं नेच्छति स्म, अन्ते च रथनिवर्तनस्य कः परिणामः अभवत् ? 1×3=3

20 अभ्यङ्गेन शरीरे के के लाभाः भवन्ति ? त्रीन् लाभान् लिखत । 1×3=3

21 'अनागतं यः कुरुते सःशोभते' इति पाठे सिंहस्य किं नाम आसीत्, सः गुहाम् आसाद्य किं चिन्तयति कश्च तत्र आगच्छति ? 1×3=3

22 ब्रह्मचर्यम् अहिंसा च कीदृशं तपः, मनःप्रसादः, सौम्यत्वं कीदृशं तपः, स्वाध्यायाभ्यसनं च कीदृशं तपः उच्यते ? 1×3=3

23 दुर्लभं त्रयमेवेतत् देवानुग्रहहेतुकम्, मनुष्यत्वं मुमुक्षत्वं महापुरुषसंश्रयः । इति पद्यं कस्मात् ग्रन्थात् उद्धृतम्, कः च तस्य ग्रन्थस्य रचयिता, कानि त्रीणि च दुर्लभानि ? एतैः त्रिभिः किं प्राप्यते ? 3

24 चन्द्रकेतुः केन सह युद्धं करोति ? चन्द्रकेतुः लवस्य कैः गुणैः आकृष्टः भवति चन्द्रकेतुः च एकाकिनं लवे दृष्ट्वा सैनिकान् कथमधिक्षिपति ? 1+1+1=3

25 'समानी वः आकूतिः समाना हृदयानि वः' इति पंक्तौ 'चिन्तनम्' 'युष्माकं' इति पदयोः स्थाने किं पदद्वयं प्रयुक्तम् ? किं 'समाना' इति पदं शुद्धम् ? 1×3=3

26 'अर्हतानां तु विनयमूलमेव धर्मः, आचार्याः अपि विनीतानाम् उपर्येव कृपां कुर्वन्ति' इति वाक्ये 'योग्यानाम्' इति कृते किं पदं प्रयुक्तम् ? के च विनीतानाम् उपरि एव कृपां कुर्वन्ति ? अनेन का शिक्षा प्राप्यते ? 1×3=3

27 अधोलिखितपद्यस्य अन्वये रिक्तस्थानपूर्तिं कुरुत । **1×3=3**

पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि ।

अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः ॥

**अन्वयः**

पादपाः ______ तथा विविधैः गन्धैः ______ च धूपैः अरोगाः पुष्पिताः सन्ति ______ (ते) जिघ्रन्ति ।
(i) (ii) (iii)

28 अधोलिखितां पंक्तिं पठित्वा प्रदत्तप्रश्नान् उत्तरत – **1×3=3**

'गुरुवचनम् अमलमपि सलिलम् इव महदुपजनयति श्रवणस्थितं शूलम् अभव्यस्य, इतरस्य तु करिणः शंखाभरणमिव आननशोभासमुदयम् अधिकतरमुपजनयति ।'

**प्रश्नाः**

(i) गुरुवचनं कस्य कृते वेदनाजनकं भवति ?

(ii) मुखस्य कृते किं पदमत्र प्रयुक्तम् ?

(iii) 'अमलम्' इति पदं कस्य विशेषणम् ?

29 अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत –

''राजन् ! मन्त्रसिद्धिम् इच्छन् अहं भवतः सहायतां वाञ्छामि । आगामिन्यां कृष्णचतुर्दश्यां रात्रौ महाश्मशानस्य समीपे वटवृक्षस्य अधः अहं भवन्तं प्रतीक्षिष्ये ।''

**प्रश्नाः**

(1) कः मन्त्रसिद्धिम् इच्छति ? **1**

(2) 'भवन्तम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ? **1**

(3) मन्त्रसिद्ध्यर्थं राज्ञः आगमनाय कः समयः स्थानञ्च निश्चितम् कृतम् । $\frac{1}{2}+\frac{1}{2}$

**30** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – **1×3=3**

माण्डले निर्जनस्थाने नीतोऽसौ सुविचारकः ।
लिखितं कर्मयोगस्य रहस्यं श्रेष्ठमद्भुतम् ॥

**प्रश्नाः**

(i) सुविचारकः असौ कः आसीत् ?

(ii) सः कुत्र कारागारे नीतः ?

(iii) तत्र कारावासे तेन किं लिखितम् ?

**31** अधोलिखितं नाट्यांशं आधारीकृत्य प्रश्नान् उत्तरत – **1×3=3**

शार्ङ्गरवः: भगवन् । ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते । तदिदं सरस्तीरम्, अत्र सन्दिश्य प्रतिगन्तुमर्हसि ।

कण्वः: सा त्वं गुरून् शुश्रुषस्व । परिजनेषु बाहुल्येन उदारा भव । अगर्विता भव । एवं युवतयः गृहिणीपदं यान्ति ।

गौतमी – जाते ! एतत् खलु सर्वम् अवधारय ।

**प्रश्नाः**

(i) प्रस्थानकाले का खलु परम्परा आसीत् ?

(ii) युवतयः गृहिणीपदं कथं यान्ति ?

(iii) गौतमी शकुन्तला किम् अवधारयितुं कथयति ?

**32** भारतस्य वैशिष्ट्यं त्रिषु पंक्तिषु वर्णयत । **1×3=3**

**33** अधोलिखितेषु कस्यचिदेकस्य विशिष्टं योगदानं षड्वाक्येषु लिखत । **1×6=6**

(i) बोधिसत्त्वः – करुणापराः हि साधवः ।

(ii) बाणभट्टः – कादम्बरीतः अजलं स्नानम् ।

(iii) लोकमान्यः तिलकः – स्वतन्त्रता जन्मसिद्धः अधिकारः ।

**34** अधोलिखित कथासु एकस्याः सारं षड्वाक्येषु लिखत **1×6=6**

(i) त्याज्यं न धैर्यम्

(ii) यद्भविष्यो विनश्यति

(iii) प्राणस्य श्रेष्ठत्वम्

**35** अधोलिखितेषु कस्यचिदेकस्य चरित्रं षड्वाक्येषु वर्णयत **1×6=6**

(i) राजा त्रिविक्रमसेनः

(ii) कण्वः

(iii) बोपदेवः

**36** कमपि एकं विषयम् अधिकृत्य षड्वाक्येषु एकमनुच्छेदं लिखत **1×6=6**

(i) धर्मलक्षणम्

(ii) स्वास्थ्यम्

(iii) गुरूपदेशः

**37** स्वमित्रं प्रति नववर्षस्य आगमनमधिकृत्य शुभकामनाः प्रेषयितुं पत्रं लिखत । **1+1+2+1+1=6**

---

For any help and enquiry realted to NIOS please contact SS Coaching at 9839065533